# Shri Guru Paduka Pushpa Mala

# શ્રીગુરુપાદુકાપુષ્પમાલા

## Document Information

Text title : Guru Paduka Pushpa Mala

File name : gurupAdukApuShpamAlA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Makhanlal Kokil

Transliterated by : Swathi R Venkat

Proofread by : Swathi R Venkat

Description/comments : Offering to Makhanlal Kokil's guru.

Latest update : May 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2021

*sanskritdocuments.org*

# શ્રીગુરુપાદુકાપુષ્પમાલા

ॐ શ્રીગુરવે નમઃ ।
મદ્ધૃત્સ્થં સુભગાકારં સર્વસૌખ્યકરં પરમ્ ।
ભવતાપહરં શૂરં વરેણ્યં વિદુષાં મતમ્ ॥ ૧॥

મહનીયાકૃતિં દેવં શ્રીગુરું પરમં વિભુમ્ ।
લક્ષ્મણં લક્ષણૈર્યુક્તં પ્રણૌમિ સર્વદં સદા ॥ ૨॥ (યુગલકં)

દાસોઽહમસ્મિ મૂઢોઽહં ત્વદ્દયાવઞ્ચિતઃ ખલુ ।
કૃપાકટાક્ષપૂરૈસ્ત્વં પૂરય વિરસં મનઃ ॥ ૩॥

દર્શં દર્શં ભવદ્રૂપં તૃણ્મદીયા ન શામ્યતિ ।
શ્રાવં શ્રાવં ભવત્કીર્તિં શુશ્રૂષા નાપક્ષીયતે ॥ ૪॥

સ્મારં સ્મારં ભવન્નામ જિગીષા નાપચીયતે ।
પાયં પાયં ભવદ્વાક્યં મત્પિપાસા પ્રવર્ધતે ॥ ૫॥

કૌલાખ્યે શૈવશાસ્ત્રે યઃ વિગ્રહીવ કલૌ યુગે ।
સન્તારયતિ જ્ઞાનસ્ય પોતેન શરણાગતાન્ ॥ ૬॥

અવાપ્તુકામો ભવદાશ્રયં હિ વિષણ્ણચેતા વિભવાબ્ધિમગ્નઃ ।
ત્વત્પૂતપાદાબ્જપરાગકાઙ્ક્ષી દ્વારે તવ પ્રાઞ્જલિરાગતોઽસ્મિ ॥ ૭॥

ધુનોતિ વાયુર્હિ યથા મહીરુહાન્ ઇયં તથા દુષ્પ્રકૃતિર્મનુષ્યાન્ ।
પરં ભવદ્દર્શનવાતપાલિતાન્ નરાન્ સમર્થોઽસ્તિ ન કોઽપિ ધર્ષિતુમ્ ॥ ૮॥

અલ્પજ્ઞાન્ કુજનાન્ ધીમાન્ કૌલાચારવિવર્જિતાન્ ।
નવાભિનવકૈર્ભાવૈઃ પ્રપૂરયતિ મદ્ગુરુઃ ॥ ૯॥

ત્વદ્વાક્યતન્ત્ર્યોદ્ધત રમ્યનાદૈઃ મનોજ્ઞભાવૈઃ રસપૂરિતં સત્ ।
સ્વાન્તં મદીયં રસભાવહીનં પ્રાપ્નોત્યનાખ્યાં સ્થિતિમદ્વિતીયામ્ ॥ ૧૦॥

ભવત્પદાબ્જેન મનાક્ સ્પૃષ્ટે મલન્ત્રિધા દ્રાગપયાતિ કુત્ર ।

જાને ન ભો કૌલિકદેશિકેન્દ્ર ! એતદ્ધિ સત્યં ન મૃષાબ્રવીમિ ॥ ૧૧॥

પૂતં વિવિક્તં દશરાગવર્જિતં સત્ત્વે સુનિષ્ઠં નયનામૃતં પરમ્ ।
સ્વતન્ત્રવિદ્વજ્જનવૃન્દવન્દિતં ગુરું દયાર્દ્રં પ્રણમામિ નિત્યમ્ ॥ ૧૨॥

સ્મૃતૌ નિમગ્નઃ વિરહાતુરસ્ત્વહં લેભે ન શાન્તિં ન સુખં ન નિદ્રામ્ ।
નિકામપાનીયયુતાં ન કોઽપિ હિત્વા નદીં સઞ્જતિ તૃષ્ણિકાયામ્ ॥ ૧૩॥

તવ ભક્તિસુધાહીના દશા ન માં સુખાવહા ।
મધુકુમ્ભે મહાલબ્ધે દ્રાક્ષેહા નોપજાયતે ॥ ૧૪॥

ન ભોગવિભવં કાઙ્ક્ષે ન સુખં નાર્થસઞ્ચયઃ ।
પરમેકા ભવદ્ભક્તિરસ્તુ મે સર્વસૌખ્યદા ॥ ૧૫॥

સુદર્શનઃ સદાસ્તુ મામનન્તાનન્દવર્ધકઃ ।
સંવિન્માર્ગો ભવત્પ્રાપ્તિસાધકઃ ત્રિગુણાત્મકઃ ॥ ૧૬॥

નાસીનસ્ય ન સુપ્તસ્ય ભ્રમતો નોત્થિતસ્ય ન ।
ત્વામન્તરાશમોનાસ્તિ દિવા રાત્રૌ ચ જાગ્રતઃ ॥ ૧૭॥

કઠોરઃ કોમલાઙ્ગોઽસિ દુર્ધષઃ સુલભોઽસિ ત્વમ્ ।
ઉગ્રઃ શાન્તસ્વભાવોઽસિ દાને રતોઽસિ નિર્મદઃ ॥ ૧૮॥

બભર્તિ ભક્તાન્ સ્વસ્નેહધારયા જહર્તિ દુષ્ટાન્ ભવભક્તિબાધકાન્ ।
વિભૂતિસુસિદ્ધિસમૃદ્ધિયુક્તાન્ ચકર્તિ લોકાન્ સ્વકૃપાકટાક્ષૈઃ ॥ ૧૯॥

સમાનભાવેન સમાનપ્રીત્યા સમત્વયોગી સમતાપ્રચારકઃ ।
સર્વાન્ શરણ્ય શરણાગતાઞ્ચ કારુણ્યભાવેન સમીક્ષસે ત્વમ્ ॥ ૨૦॥

ત્વગ્ મજ્જાસ્થિ હૃદિ વ્યાપ્તં જન્માન્તરૈરુપાર્જિતમ્ ।
તત્સર્વં નાશયત્વીશ ! યદઘૌઘં મયા કૃતમ્ ॥ ૨૧॥

એકવિંશતિપુષ્પાણાં કોકિલેન કૃતા મયા ।
માલા શ્રીગુરુદેવસ્ય લક્ષ્મણસ્ય પ્રસાદયે ॥

ઇતિ શ્રીમખનલાલકોકિલવિરચિતા શ્રીપાદુકાપુષ્પમાલા ।
ઇતિ શિવં

Encoded and proofread by Swathi R Venkata

*Shri Guru Paduka Pushpa Mala*

pdf was typeset on May 14, 2021

Please send corrections to *sanskrit@cheerful.com*